QNP71S

## द्वितीयः पाठः

# न त्यक्तव्यः अभ्यासः

कस्मिंश्चित् ग्रामे बहुकालपर्यन्तम् अनावृष्टिः आसीत्। भूमिः शुष्का जाता। पानजलस्य अपि अभावः जातः। तदा जनाः दैवज्ञस्य समीपं गत्वा विचारितवन्तः। दैवज्ञः ग्रहगतिं परिशील्य उक्तवान् "न केवलम् अस्मिन् वर्षे अपि तु आगामिवर्षत्रयपर्यन्तमत्र वृष्टिः न भविष्यति" इति।



तत् श्रुत्वा ग्रामवासिनः सर्वे जीवनार्थं यत्र कुत्रापि गतवन्तः। स ग्रामः एव निर्जनः जातः। परन्तु तस्मिन् अपि काले तस्य ग्रामस्य एकः कृषकः तत्र स्थितवान्। जलाभावेऽपि सः प्रतिदिनं स्वशुष्कक्षेत्रं कर्षन् आसीत्।

एकदा आकाशे एकः मेघः **सञ्चरन्** आसीत्। सः कृषकं दृष्ट्वा आश्चर्यचकितः सन् तम् अपृच्छत्– हे कृषक! अत्र त्रिवर्षपर्यन्तं वृष्टिः न भविष्यति इति किं भवता न श्रुतम्? तत्कारणेनैव सर्वे जनाः ग्रामं परित्यज्य यत्र कुत्रापि गताः। तथापि भवान् किमर्थम् इदं शुष्कं क्षेत्रं वृथा कर्षति" इति।

तदा कृषकः अवदत्– ''सर्वे विषयाः मया ज्ञाताः एव। किन्तु त्रिवर्षं यावत् यदि अहं कृषिकार्यं न करोमि तर्हि त्रिवर्षानन्तरं यदा वृष्टिः भविष्यति तदा मम कृषिकार्यं विस्मृतं भवेत्। तावता मम क्षेत्रकर्षणस्य अभ्यासः एव नष्टं भवेत्। अतएव अस्य कार्यस्य विस्मरणपरिहारार्थम् अहम् इदानीमपि कर्षामि'' इति।

तत् श्रुत्वा मेघः ''साधु, साधु'' इति वदन् चिन्तितवान्– ''यदि अहमपि त्रिवर्षं यावत् न वर्षामि तर्हि मया अपि वर्षणं विस्मृतं भवेत्। अतः अहम् अधुना एव वर्षामि'' इति।

ततः सः झटिति सर्वान् मेघान् आहूय ''कृपया वर्षन्तु'' इति प्रार्थितवान्। तदा तत्र सुवृष्टिः अभवत्। सर्वेऽपि ग्रामवासिनः आनन्देन स्वक्षेत्रे कृषिकार्यम् आरब्धवन्तः।

एतस्मिन् सन्दर्भे वयम् इदं पद्यं स्मरामः –

**अभ्यासो न हि त्यक्तव्यः अभ्यासो हि परं बलम्।**
**अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।।**

## शब्दार्थाः

| | | |
|---|---|---|
| करस्मिंश्चित् ग्रामे | – | किसी ग्राम में |
| अनावृष्टिः | – | अकाल |
| तदा | – | तब |
| दैवज्ञः | – | दैव को जाननेवाला |
| स्थितवान् | – | रहता था |
| कृषकः | – | किसान (कृषिकः व कर्षकः का अर्थ भी किसान होता है) |
| कर्षामि | – | जुताई करता हूँ |
| वदन् | – | बोलता हुआ |
| चिन्तितवान् | – | सोचा |
| वर्षन्तु | – | बरसें |
| प्रार्थितवान् | – | प्रार्थना की |
| ग्रामवासिनः | – | गाँववाले |
| साधु साधु | – | अच्छा अच्छा |
| सुवृष्टिः | – | अच्छी बारिश |

## अभ्यासः

**1. निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत –**

क) भूमिः कथं शुष्का अभवत् ?

ख) दैवज्ञः ग्रहगतिं परिशील्य किम् उक्तवान् ?

ग) अनावृष्टौ ग्रामवासिनः किम् अकुर्वन् ?

घ) कृषकः शुष्कं क्षेत्रं किमर्थं कर्षति ?

ङ) मेघः सर्वान् मेघान् आहूय किं प्रार्थनाम् अकरोत् ?

**2. पाठं दृष्ट्वा रिक्तस्थानानि पूर्तिं कुरुत –**

क) आगामिवर्षत्रयपर्यन्तमत्र .............................. न भविष्यति।

ख) तस्य ग्रामस्य एकः ......................... तत्र स्थितवान् ।

ग) इदं शुष्कं क्षेत्रं ..................... कर्षति ।

घ) यदा वृष्टिः भविष्यति तदा मम कृषिकार्यं ........................... भवेत्।

ङ.) आनन्देन स्वक्षेत्रे कृषिकार्यं ............................................... ।

**3. अधोलिखितानि कथनानि कः कं च कथयन्ति –**

| कथनानि | कः | कम्/कान् |
|---|---|---|
| क) अत्र त्रिवर्षपर्यन्तं वृष्टिः न भविष्यति | .................. | .................. |
| ख) सर्वे विषयाः मया ज्ञाताः एव | ................. | .................. |
| ग) साधु, साधु | .................. | .................. |
| घ) अहम् अधुना एव वर्षामि | .................. | .................. |
| ङ.) कृपया वर्षन्तु | .................. | .................. |

**4. स्तम्भमेलनं कुरुत –**

| | | |
|---|---|---|
| 1) सुवृष्टिः | – | परं बलम् |
| 2) पानजलस्य | – | अभवत् |
| 3) शुष्कं क्षेत्रम् | – | विचारितवन्तः |
| 4) ग्रामवासिनः | – | कर्षति |
| 5) अभ्यासो हि | – | अभावः |

**5. अधोलिखितेषु पदेषु ल्यप् प्रत्ययान्त–पदान् चिनुत –**

अभ्यासः, परिशील्य, गत्वा, उक्तवान्, दृष्ट्वा, परित्यज्य, आहूय

**6. अधोलिखितेषु वाक्येषु क्रियापदानि लोट्लकारे परिवर्तयत–**

| | | |
|---|---|---|
| **यथा** – अनावृष्टिः न भविष्यति। | – | अनावृष्टिः न भवतु। |
| क) कृषकः शुष्कं क्षेत्रं कर्षति । | – | ...................... |
| ख) मेघाः अत्र वर्षन्ति। | – | ...................... |
| ग) कदापि वर्षणं न विस्मरति। | – | ..................... |
| घ) कृषिकार्यम् आरभते। | – | ..................... |
| ङ.) वयम् पद्यं स्मरामः। | – | ..................... |

QNY33F

**7. अधोलिखिते श्लोके पदपूर्तिं कुरुत –**

अभ्यासो न हि ................अभ्यासो ................ परं बलम्।

................विषं विद्या अजीर्णे ............................................ ।।